*Metres with 12 Syllables in a quarter*

## ( जगती )

### ( 1 ) इन्द्रवंशा

Def. तच्चेन्द्रवंशा प्रथमाक्षरे गुरौ ।
Sch. G. इन्द्रवंशा is the same as वंशस्थविल or वंशस्थ (see 13 below) except that its first syllable is long :— The Ganas are, त, त, ज, र.
Ex. दैत्येन्द्र**वंशा**मिरुदीर्णदीधितिः
पीताम्बरोऽसौ जगतां तमोपहः ।
यस्मिन् ममज्जुः शलभा इव स्वयं
ते कंसचाणूरमुखा मखद्विषः ॥

### ( 2 ) चन्द्रवर्त्म

Def. चन्द्रवर्त्म निगदन्ति रनभसैः ।
Sch. G. र, न, भ, स (4. 8).
Ex. **चन्द्रवर्त्म** पिहितं घनतिमिरै
राजवर्त्म रहितं जनगमनैः ।
इष्टवर्त्म तदलंकुरु सरसे
कुञ्जवर्त्मनि हरिस्तव कुतुकी ॥

### ( 3 ) जलधरमाला

Def. अब्ध्यङ्गैः स्याज्जलधरमालाम्भौ स्मौ ।
Sch. G. म, भ, स, म (4. 8).
Ex. या भक्तानां कलिदुरितोत्तप्तानां
तापच्छेदे **जलधरमाला** नव्या ।
भव्याकारा दिनकरपुत्रीकूले
केलीलोला हरितनुरव्यात् सा वः ॥
See Ki. 5. 23.

### ( 4 ) जलोद्धतगति

Def. रसैर्जसजसा जलोद्धतगतिः ।
Sch. G. ज, स, ज, स (6. 6).
Ex. समीरशिशिरः शिरस्सु वसतां
सतां जवनिका निकामसुखिनाम् ।
बिभर्ति जनयन्नयं मुदमपा-
मपायधवला बलाहकततीः ॥ Śi. 4. 54.

### ( 5 ) तामरस

Def. इह वद तामरसं नजजा यः ।
Sch. G. न, ज, ज, य (5. 7).
Ex. स्फुटसुषमामकरन्दमनोज्ञं
व्रजललनानयनालिनिपीतम् ।
तव मुख**तामरसं** मुरशत्रो
हृदयतडागविकाशि ममास्तु ॥

### ( 6 ) तोटक

Def. वद तोटकमब्धिसकारयुतम् ।
Sch. G. स, स, स, स (4. 4. 4).
Ex. स तथेति विनेतुरुदारमतेः
प्रतिगृह्य वचो विससर्ज मुनिम् ।
तदलब्धपदं हृदि शोकघने
प्रतियातमिवान्तिकमस्य गुरोः ॥ R. 8. 91.
See Śi. 6. 71.

### ( 7 ) द्रुतविलम्बित

Def. द्रुतबिलम्बितमाह नभौ भरौ ।
Sch. G. न, भ, भ, र (4. 8. or 4. 4. 4).
Ex. मुनिसुताप्रणयस्मृतिरोधिना
मम च मुक्तमिदं तमसा मनः ।
मनसिजेन सखे प्रहरिष्यता
धनुषि चूतशरश्च निवेशितः ॥ Ś. 6.
See R. 9; Śi. 6 also.

### ( 8 ) प्रभा

( also called मन्दाकिनी ).

Def. स्वरशरविरतिर्ननौ रौ प्रभा ।
Sch. G. न, न, र, र (7. 5).
Ex. अतिसुरभिरभाजि पुष्पश्रिया-
मतनुत रतयेव संतानकः ।
तरुणपरभृतः स्वनं रागिणा-
मतनुत रतये वसन्तानकः ॥ Śi. 6. 67; also Ki. 5. 21.

### ( 9 ) प्रमिताक्षरा

Def. प्रमिताक्षरा सजससैः कथिता ।
Sch. G. स, ज, स, स (5. 7).
Ex. विहगाः कदम्बसुरभाविह गाः
कलयन्त्यनुक्षणमनेकलयम् ।
भ्रमयन्नुपैति मुहुरभ्रमयं
पवनश्च धूतनवनीपवनः ॥ Śi. 4. 36;
Ki. 6; Śi. 9 also.

### ( 10 ) भुजङ्गप्रयात

Def. भुजङ्गप्रयातं चतुर्भिर्यकारैः ।
Sch. G. य, य, य, य (6. 6).
Ex. धनैर्निष्कुलीनाः कुलीना भवन्ति
धनैरापदं मानवा निस्तरन्ति ।
धनेभ्यः परो बान्धवो नास्ति लोके
धनान्यर्जयध्वं धनान्यर्जयध्वम् ॥

### ( 11 ) मणिमाला

Def. त्यौ त्यौ मणिमाला छिन्ना गुहवक्त्रैः ।
Sch. G. त, य, त, य (6. 6).
Ex. प्रह्वामरमौलौ रत्नोपलक्लृप्ते
जातप्रतिबिम्बा शोणा **मणिमाला** ।
गोविन्दपदाब्जे राजी नखराणा-
मास्तां मम चित्ते ध्वान्तं शमयन्ती ॥

### ( 12 ) मालती

( Also called यमुना ).

Def. भवति नजावथ मालती जरौ ।
Sch. G. न, ज, ज, र (5. 7).
Ex. इह कलयाच्युत केलिकानने
मधुरससौरभसारलोलुपः ।
कुसुमकृतस्मितचारुविभ्रमा-
मलिरपि चुम्बति **मालतीं** मुहुः ॥